पाल, क रक्षे । इति कविकल्पद्रुमः । (चुरां-परं-सकं-सेट् ।) क, पालयति । ह्रस्ववर्त्तेदेरसिद्धिं दीर्घिणोऽपि पाठः । कानुबन्धानामिदनुबन्धवत् णेरनित्यतां बोधयति । तेन पालति पलति इत्यपि सिद्धम् । इति दुर्गादासः ॥

पालः, पुं, (पालयतीव निष्ठीवनादिकमिति । पालि + अच् ।) पतद्ग्रहः । इति हेमचन्द्रः ॥ पिक्दान् इति भाषा ॥ पालके, त्रि । यथा,
"दिवावक्तव्यता पाले रात्रौ स्वामिनि तद्गृहे ।
योगक्षेमेऽन्यथा चेत्तु पालो वक्तव्यतामियात् ॥"
इति मनुः ॥

पालकः, पुं, (पालयतीति । पालि + ण्वुल् ।) घोटकरक्षकः । तत्पर्य्यायः । अश्वरक्षः २ वल्लभः ३ । इति जटाधरः ॥ चित्रकवृक्षः । इति राजनिर्घण्टः ॥ पालनकर्त्तरि, त्रि । यथा, प्रायश्चित्ततत्त्वे ।
"गोपालको गवां गोष्ठे यस्तु धूमं न कारयेत् ।
मक्षिकालीननरके मक्षिकाभिः स भक्ष्यते ॥"

पालकाप्यः, पुं, मुनिविशेषः । तत्पर्य्यायः । करेणुभूः २ । इति हेमचन्द्रः ॥ धन्वन्तरिः । इति त्रिकाण्डशेषः ॥

पालघ्नः, पुं, (पालं क्षेत्रं हन्तीति । हन + टक् ।) छत्त्रा । इत्यमरः । २ । ५ । १६० ॥

पालङ्कः, पुं, (पाल रक्षणे + सम्पदादित्वात् क्विप् । तेन अङ्क्यते इति । अङ्क + घञ् ।) शल्लकी । शाकभेदः । पालङ् इति भाषा । श्राजिपक्षी । इति मेदिनी । के, ११७ ॥ बाज इति भाषा ॥

पालङ्की, स्त्री, (पालङ्क + गौरादित्वात् ङीष् ।) कुन्दुरुनामगन्धद्रव्यम् । इत्यमरः । २।४।१२१ ॥ शाकभेदः । पालङ् इति भाषा ॥ (यथा, सुश्रुते चिकित्सितस्थाने ६ अध्याये ।
"यथादोषशाकैर्व्वास्तूकतण्डुलीयकजीवन्त्युपोदिकाश्ववलावालमूलकपालङ्क्यसनचिल्लीचुञ्चुकलायचल्लीभिरन्यैर्व्वा ॥") अस्या गुणाः । कफपित्तवातविबन्धनाशित्वम् । रुच्यत्वञ्च । इति राजवल्लभः ॥

पालङ्क्यं, क्ली, (पालङ्क + स्वार्थे ष्यञ् ।) शाकभेदः । पालङ् इति भाषा ॥ तत्पर्य्यायः । पलक्या २ मधुरा ३ क्षुरपत्रिका ४ सुपत्रा ५ स्निग्धपत्रा ६ ग्रामीणा ७ ग्राम्यवल्लभा ८ । अस्य गुणाः । ईषत् कटुत्वम् । मधुरत्वम् । पथ्यत्वम् । शीतलत्वम् । रक्तपित्तहरत्वम् । ग्राहित्वम् । परमतर्पणत्वञ्च । इति राजनिर्घण्टः ॥

पालङ्क्या, स्त्री, (पालङ्क्य + स्त्रियां अजादित्वात् टाप् ।) कुन्दुरुः । इत्यमरः ॥ कुन्दुरुखोटी इति भाषा । पालङ्कशाकः । तत्पर्य्यायः । वास्तुकाकारा २ छुरिका ३ चीरितच्छदा ४ । (यथा, सुश्रुते । १ । ४२ ।
"प्रायशः कुरवककोविदारकजीवन्तीचिल्लीपालङ्क्यासुनिषसकप्रभृतीनि नीवारादयो मुद्गादयश्च समासेन कषायो वर्गः ॥") अस्या गुणाः । वातलत्वम् । शीतलत्वम् । श्लेष्मलत्वम् । भेदनत्वम् । गुरुत्वम् । विष्टम्भित्वम् । मदश्वासपित्तरक्तविषापहत्वञ्च । इति भावप्रकाशः ॥

पालनं, क्ली, (पाल्यतेऽनेनेति । पालि + "करणाधिकरणयोश्च ।" ३ । ३ । ११७ । इति ल्युट् ।) सद्यःप्रसूताया गोः क्षीरम् । इति शब्दचन्द्रिका ॥ (पाल रक्षणे + भावे ल्युट् ।) रक्षणम् । यथा, "अभिषेकादिगुणयुक्तस्य राज्ञः प्रजापालनं परमो धर्म्मः ॥" इति मिताक्षरा ॥

पालाशं, क्ली, (पलाशस्येदमिति । अण् ।) तमालपत्रम् । इति राजनिर्घण्टः ॥ तेजपात इति भाषा ॥ (यथा, वाभटे गुल्मचिकित्सितायाम् ।
"पालाशं दहनार्ज्जुनं प्रतिजयापामार्गकुम्भाण्डकम् ॥")

पालाशः, पुं, (पलाशस्य वर्ण इव वर्णोऽस्त्यस्येति । अच् ।) हरिद्वर्णः । (यथा, बृहत्संहितायाम् । ६३ । ४ ।
"पालाशताम्रासितकर्व्वुराणाम् ॥")
तद्वर्णविशिष्टे पलाशवृक्षसम्बन्धिनि च, त्रि । इत्यमरः ॥ (यथा, मनुः । २ । ४५ ।
"ब्राह्मणो वैल्वपालाशौ क्षत्त्रियो वटखादिरौ ॥")

पालाशषण्डः, पुं, (पालाशानां पलाशवृक्षाणां षण्डो यत्र ।) मगधदेशः । इति शब्दरत्नावली ॥ पलाशसमूहश्च ॥

पालिः, स्त्री, (पल्यते पाल्यते इति । पल पालने + "वहुलकात् प्रलतिपलतिभ्याञ्च ।" ४ । १२९ । इत्युज्ज्वलदत्तोक्त्या इण् ।) कर्णलताग्रम् । (यथा,
"यस्य पालिद्वयमपि कर्णस्य न भवेदिह ।
कर्णपीठं समे मध्ये तस्य विद्धा विवर्द्धयेत् ॥
बाह्यायामिह दीर्घायां सन्धिराभ्यन्तरो भवेत् ।
आभ्यन्तरायां दीर्घायां बाह्यसन्धिरुदाहृतः ॥
एकैव तु भवेत् पालिः स्थूला पृथ्वी स्थिरा च या ।
तां द्विधा पाटयित्वा तु छित्त्वा चोपरि सन्धयेत् ॥
गण्डादुत्पाट्य मांसेन सानुबन्धेन जीवता ।
कर्णपालिमपालेस्तु कुर्य्यान्निर्लिख्य शास्त्रवित् ॥"
"कर्णपाल्यामयान्नॄणां पुनर्व्वक्ष्यामि सुश्रुत ! ।
कर्णपाल्यां प्रकुपिता वातपित्तकफास्त्रयः ॥
द्विधा वाप्यथ संसृष्टाः कुर्व्वन्ति विविधा रुजः ।
विस्फोटः स्तब्धता शोफः पाल्यां दोषे तु वातिके ॥
दाहविस्फोटजननं शोफः पाकश्च पैत्तिके ।
कण्डूः सश्वयथुः स्तम्भो गुरुत्वञ्च कफात्मके ॥
यथादोषञ्च संशोध्य कुर्य्यात्तेषां चिकित्सितम् ।
स्वेदाभ्यङ्गपरीषेकैः प्रलेपासृग्विमोक्षणैः ॥
मृद्वीं क्रियां बृंहणीयैर्यथास्वं भोजनैस्तथा ।
य एवं वेत्ति दोषाणां चिकित्सां कर्त्तुमर्हति ॥
अत ऊर्द्धं नामलिङ्गैर्व्वक्ष्ये पाल्यामुपद्रवान् ।
उत्पाटकश्चोत्पुटकः श्यावः कण्डूयुतो भृशम् ॥
अवमन्थः सकण्डूको ग्रन्थिको जम्बुलस्तथा ।
स्रावी च दाहवांश्चैव इत्येषां क्रमशः क्रियाम् ॥
अपामार्गः सर्ज्जरसः पाटलालकुचत्वचौ ।
उत्पाटके प्रलेपः स्यात् तैलमेभिश्च पाचयेत् ॥
शम्पाकशिग्रुपूतीकगोधामेदोऽथ तद्वसा ।
वाराहं गव्यमैणेयं पित्तं सर्पिश्च संहरेत् ॥
लेपमुत्पुटके दद्यात्तैलमेभिश्च साधितम् ।
गौरीं सुगन्धां सश्यामामनन्तां तण्डुलीयकम् ॥
श्यावे प्रलेपनं दद्यात्तैलमेभिश्च साधितम् ।
पाठां रसाञ्जनं क्षौद्रं तथास्यादुष्णकाञ्जिकम् ॥
दद्याल्लेपं सकण्डूके तैलमेभिश्च साधितम् ।
व्रणीभूतस्य देयं स्यादिदं तैलं विजानता ॥
मधुकं क्षीरकाकोली जीवकाद्यैर्विपाचितम् ।
गोधावराहसर्पाणां वसाः स्युः क्षतबृंहणे ॥
प्रलेपनमिदं दद्यादवसिच्यावमन्थके ।
प्रपौण्डरीकं मधुकं समङ्गां धवमेव च ॥
तैलमेभिश्च सम्पक्वं प्रदद्यात् कण्डूमतः क्रियाम् ।
सहदेवा विश्वदेवा अजाक्षीरंससैन्धवम् ॥
एतैरालेपनं दद्यात् तैलमेभिश्च साधितम् ।
ग्रन्थिके गुटिकां पूर्व्वं स्रावयेदवपाट्य तु ॥
ततः सैन्धवचूर्णन्तु घृष्ट्वा लेपं प्रदापयेत् ।
लिखित्वा तत् स्रुतं घृष्ट्वा चूर्णैं रोध्रस्य जम्बुले ॥
क्षीरेण प्रतिसार्य्यैनं शुद्धं संरोपयेत्ततः ।
मधुपर्णीं मधूकञ्च मधुकं मधुना सह ॥
लेपः स्राविणि दातव्यस्तैलमेभिश्च साधितम् ।
पञ्चकल्कैः समधुकैः पिष्टैस्तैश्च घृतान्वितैः ॥
जीवकाद्यैः ससर्पिष्कैर्दह्यमानं प्रलेपयेत् ॥"
इति सुश्रुते छत्रस्थाने षोड़शेऽध्याये ॥)
अश्रिः । पङ्क्तिः । (यथा, गीतगोविन्दे । ६ । १० ।
"विपुलपुलकपालिः स्फीतशीत्कारमन्तर्जनितजड़िमकाकुव्याकुलं व्याहरन्ती ॥")
अङ्कप्रभेदः । छात्रादिदेयम् । इति मेदिनी । ले, ३० ॥ यूका । जातश्मश्रुस्त्री । प्रान्तः । (यथा, गीतगोविन्दे । ३ । १३ ।
"भ्रूपल्लवं धनुरपाङ्गतरङ्गितानि
वाणा गुणः श्रवणपालिरिति स्मरेण ।
तस्यामनङ्गजयजङ्गमदेवताया-
मस्त्राणि निर्ज्जितजगन्ति किमर्पितानि ॥")
सेतुः । कल्पितभोजनम् । प्रशंसा । उत्सङ्गः । प्रस्थः । इति हेमचन्द्रः ॥

पालिका, स्त्री, (पालिरेव । स्वार्थे कन् टाप् च ।) अश्रिः । इति शब्दरत्नावली ॥ कर्णपत्रम् । इति शब्दचन्द्रिका । दध्यादिच्छेदनी । तत्पर्य्यायः । कुन्तलिका २ । इति हारावली ॥

पालितः, त्रि, (पाल + क्त ।) रक्षितः । यथा,—
"चित्रलेखा तमाज्ञाय पौत्रं कृष्णस्य योगिनी ।
ययौ विहायसा राजन् द्वारकां कृष्णपालिताम् ॥"
इति श्रीभागवतीयदशमस्कन्धे ६२ अध्यायः ॥
कायस्थस्य पद्धतिविशेषः ॥

पालिन्दः, पुं, (पालयतीति । पालि + बाहुलकात् किन्दच् ।) कुन्दुरुकः । इति राजनिर्घण्टः ॥

पालिन्दी, स्त्री, (पालिन्द + गौरादित्वात् ङीष् ।) श्यामालता । इति रत्नमाला ॥ (यथा, सुश्रुते कल्पस्थाने १ अध्याये ।